As on 31 march 2014, there were more than 74.30 lakh saving-linked SHGs, covering over 9.7 crore poor households. The total savings of these SHGs with banks amounted to Rs.9897.42 crore. The number of credit-linked SHGs under the programme was 41.97 lakh

**Share of SHG-bank linkage programme in rural credit during 2001-2011 (Rs.cror)**

| Year | Rural credit disbursed by the bank | Credit disbursed through SHGs | Percent share (col.2/col.1) |
|---|---|---|---|
| 1 | 2 | 3 | 4 |
| 2001-02 | 54,431 | 481 | 0.88 |
| 2002-03 | 69,560 | 1,026 | 1.47 |
| 2003-04 | 86,981 | 2,049 | 2.35 |
| 2004-05 | 1,25,309 | 3,904 | 3.11 |
| 2005-06 | 1,80,486 | 6,896 | 3.82 |
| 2006-07 | 2,29,400 | 11,398 | 4.97 |
| 2007-08 | 2,54,657 | 18,081 | 7.10 |
| 2008-09 | 2,92,437 | 22,680 | 7.75 |
| 2009-10 | 3,84,514 | 28,038 | 7.29 |
| 2010-11 | 4,46,779 | 31,221 | 6.99 |

Micro finance programme is very fast in India. 2001-02 the aggregate rural credit amounted to Rs. 54,431 crore. The credit disbursed through self help groups accounted for Rs. 481(0.88 percent). In 2010-11, the share of SHGs was Rs. 31,221 crore (6.99 percent) out of a total rural credit of Rs. 4,46,779 crore.

### ➢Progress in microfinance in india 2014-15

| Sr. no | Particulars | Achievements | |
|---|---|---|---|
| | | Physical (no.in lakhs) | Financial (crore) |
| 1 | Total number of SHGs saving linked with banks | 76.97 | 11059.86 |
| 2 | Total number of SHGs credit linked during 2014-15 | 16.26 | 27582.31 |
| 3 | Total number of SHGs having loans outstanding as on 31 March 2015 | 44.68 | 51545.4 |
| 4 | Estimated number of families covered up to 31 March | 1000 | |
| 5 | Number of banks and financial institution submitted MIS(in number) | 322 | |
| 6 | **Data on joint liability group** | | |
| | **(a)**joint liability group promoted during the year 2014-15 | 4.56 | |

| | | | |
|---|---|---|---|
| | (b)loan disbursed to joint liability groups (JLGs) during the year 2014-15 | | 4414.44 |
| | (c) cumulative joint liability group promoted as on 31 March 2015 | 11.29 | |
| | (d) cumulative loan disbursed to JLGs as on 31 March 2015 | | 11190.16 |
| 7 | **Support from NABARD** | | |
| | **(a) capacity building for partner institutions under SHG-BLP and JIGs** | | |
| | Number of programmes conducted during 2014-15(in no. only) | 4413 | |
| | **"taking rural india – forward -2** | | |
| | Number participants covered during 2014-15 | 1.32 | |
| | Cumulative number of participants trained up to March 2015 | 32.81 | |
| | **Under WSHG scheme(in LWE affected and backward districts)** | | |
| | number of programme conducted during 2014-15(in no. only) | 1142 | |
| | Number of participants covered during 2014-15 | 0.33 | |
| | **(b) refinance support** | | |
| | Refinance to banks during 2014-15 | | 4493.67 |
| | Cumulative refinance released up to 31 March 2015 | | 30635.67 |

| | | | |
|---|---|---|---|
| | ( c) **revolving fund assistance(RFA) and capital support to MFIs** | | |
| | RFA outstanding as on 31 March 2015 | | 13.57 |
| | Capital support outstanding as on 31 March 2015 | | 6.30 |
| | Refinance disbursed to NBFC – MFIs during 2014-15 | | 330.00 |
| | **(d) grant assistance to SHPIs for promotion of SHGs under SHG-BLP** | | |
| | Grant assistance sanctioned during 2014-15 | | 26.80 |
| | Cumulative sanctioned up to 31 March 2015 | | 301.29 |
| | (e)cumulative grant assistance sanctioned to anchor NGOs for promotion of SHGs under WSHG development scheme up to 31 March 2015 | | 201.45 |
| | (f) cumulative grant assistance sanctioned to JLPIs for promotion of JLGs up to 31 March 2015 | | 114.30 |

(source: annual report 2015)

As per the Socio Economic and Caste Census [SECC] 2011 out of more than 1794 rural lakh Households about 1337 lakh [75%] households are having a monthly income of the highest earning member of the households below 5000. All these households seem to be in the economically backward and deprived category and living in a state of poverty or near poor

status. These households constitute the potential segment to be a part of SHG Bank Linkage Programme. According to one estimation about 1000 lakh households have joined SHG movement and there is a gap of about 563 lakh households who con form nearly 43 lakh additional SHGs.

## ➢References

Chauhan Ramesgsingh M.& Patel Hina M., (2014), “Role of microfinance in women empowerment”,Prism books (India),Jaipur

Lokhande Murlidhr A. (2014). **Micro Finance and Women Empowerment.** New Delhi: New Century Publication-India.

Das Sudhansu Kumar et al.,(2012). **Micro Finance and Empowerment of Rural Poor in India,** New Delhi: New Century Publication-India.

Censes 2011

Status of Microfinance in India 2014-15

Annual Report 2015

# आदर्शमनुष्यजीवनतत्त्वम्

डॉ. अनिलभाई ओ. महेता
(नव्यव्याकरणाचार्य्यः तत्त्वाचार्य विद्यावारिधिश्च)
प्राध्यापकः
श्रीआणदाबावावेदान्तसंस्कृतमहाविद्यालयः
धोरीवाव-जामनगरम्

9

१.१ आदर्शपदस्य व्याख्यानम् ।

पाणिनीयव्याकरणस्यानुसारमादर्शपदमिदमनेन प्रकारेण निष्पद्यते तद्यथा - दृशिर्-प्रेक्षणे [१] इत्यस्माद्धातोः 'हलश्च[२]' इति पाणिनीयसूत्रेण घञ्प्रत्ययेऽनुबन्धलोपे स्वादिकार्य्ये च आदर्शपदमिति निष्पद्यते, आदर्शपदस्यार्थो भवति यद् - आसमन्ताद् दृश्यते स्वस्य रूपमिति आदर्शः, अथवा आदृश्यते स्वस्य रूपमस्मिन्निति आदर्शः, यत्र स्वस्य विविधैः कार्य्यैः स्वयमेव स्वस्य रूपं पश्यति इति आदर्शः, आदर्शपदस्यामरकोशकारः पर्य्यायवाचिनश्शब्दान् प्रददाति यद् -

दर्पणे मकुरादर्शौ[३]।।

अत्र दर्पणन्नाम स्वरूपमवलोक्य हर्षयति इति दर्पणम् , अत्र दृप-हर्षमोचनयोः[४] इत्यस्माद्धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः[५]' इति पाणिनीयसूत्रेण अच्प्रत्ययेऽनुबन्धलोपे स्वादिकार्य्ये च दर्पणपदमिति निष्पद्यते, दर्पणपदस्यार्थो भवति यद् - दृप्यति नाम स्वस्य गुणानवलोक्य संसारबन्धनाद् मुक्तो भवति इति दर्पणम् । आदर्शपदस्यापरोऽर्थो वर्तते यद् - मकुरः , अस्यार्थो भवति यद् - मकि-मण्डने[६] इत्यस्माद्धातोः 'मकुरदर्दुरौ[७]' इति उणादिसूत्रेण उरच्प्रत्ययेऽनुबन्धलोपे स्वादिकार्य्ये च मकुरपदमिति निष्पद्यते, मकुरपदस्यार्थो भवति यद् - मङ्क्ते नाम स्वस्य गुणैः स्वयमेव भूषयति इति मकुरः । अनेन प्रकारेण आदर्शस्य विविधोऽर्थो भवति यद् - स्वकीयैर्विविधैः सत्कार्य्यैः समाजं वा स्वात्मानं पश्यति, दृप्यति, भूषयति इति आदर्शः, अत आदर्शमानवः सर्व्वं कर्त्तुं शक्नोति यथा -

---

[१] भ्वादिधातुः १०५७

[२] पा. सू. ३।३।१२१

[३] अमरकोशः २।७।१४०

[४] दिवादिधातुः १३०५

[५] पा. सू. ३।१।१३४

[६] भ्वादिधातुः ८०४

[७] उ. सू. १४०

१. आदर्श एव मानव एव आदर्शस्वकुटुम्बं निर्मातुं शक्नोति ।

२. आदर्श एव मानव एव आदर्शसमाजं निर्मातुं शक्नोति ।

३. आदर्श एव मानव एव आदर्शस्वराज्यं निर्मातुं शक्नोति ।

४. आदर्श एव मानव एव आदर्शस्वदेशं निर्मातुं शक्नोति ।

५. आदर्श एव मानव एव आदर्शविश्वं निर्मातुं शक्नोति ।

अनेन सर्व्वाः स्मृतय आदर्शं मानवं कर्त्तुमर्हन्ति, अतो मया विषयोऽयं गृहीतः कथं यद् –

संयोजयति विद्यैव नीचगापि नरं सरित् ।
समुद्रमिव दुर्घर्षं नृपं भाग्यमतः परम्[८] ।।

नायं प्रयाति विकृतिं विरसो न यः स्या-
न्न क्षीयते बहुजनैर्नितरां निपीतः ।
जाड्यं निहन्ति रुचिमेति करोति तृप्तिं
नूनं सुभाषितरसोऽन्यरसातिशायी[९] ।।

सर्वाणि स्मृतिशास्त्राण्येवामानवान् मानवान् कर्त्तुं शक्नुन्ति, मानवानां जीवने प्रशस्तादर्शो भवेद् , एतदर्थमेव ऋषिभिर्महर्षिभिश्च स्मृतिशास्त्राणि विरचितानि सन्ति, यथा वेदभगवान् मानवेभ्यः सदा सर्वदा चोपदेशं ददाति । अस्माकं सर्वेषां मानवानां स्वस्तिमयं सद्भावमयं प्रशस्तं चाचरणम्भवेत् , तथा च यदाहं लघुरासम् , तस्मिन्काले मम स्नेहमय्या मातुः क्रोडे लुण्ठयित्वा प्रमुदितो भूत्वा यस्या अमृतमयं स्तन्यं पायं पायं पादाघातेन मातुरङ्गानि निपीडयामि स्म, तथापि मे माता लालनपालनं कुर्वती सम्पोषयामास, सम्प्रति पूजनीयो जनकस्तथा पूजनीया मे माता वृद्धा जाता, अतः तयोः सेवासत्कारादिभिः सन्तुष्टौ कर्तव्यौ, इति पुत्रस्य सत्कर्तव्यं सूचयन्ति । मानवजीवनस्य वास्तविकं लक्ष्यमस्ति यत् – स्वस्य कल्याणं भवेद् । जीवनस्य यथार्थं कल्याणमस्ति यद् – जन्ममरणबन्धनान्मुक्तिः, अथवा भगवत्प्राप्तिः । अतो जीवनस्य प्रतिक्षणं पित्रोः परिपालनेनैतत्सर्वं भवितुमर्हति । अतो वेदैः स्मृतिभिः पुराणैश्च निर्दिष्टमार्गेण जीवनयापनेन सम्भवितुमर्हति । जन्मतो मृत्युपर्यन्तं तथा प्रातः जागरणाद् शयनपर्यन्तं स्वकर्तव्यस्य यथाशास्त्रं परिपालनम् , अतो मन्त्रा एतदेव कथयन्ति, यत् – स्वकर्तव्यपालनेन सर्वसुखप्राप्तिः । अस्माकं नैकानि कर्तव्यानि सन्ति, यथा – छात्राणां छात्रकर्तव्यानि, राज्ञां राजधर्मकर्तव्यानि, मित्राणां मित्रकर्तव्यानि, स्त्रीणां कृते स्त्रीकर्तव्यानि, गृहस्थानां गृहस्थकर्तव्यानि, इत्थं समेषां जीवने स्वकर्तव्यपालने कया रीत्या भवेद् – नीतिशतके स्थिता नीतिश्लोकाश्च सदा सर्वदा च मानवानां हिताय स्वस्वकार्यं कुर्वन्ति, आधुनिकसमाजेऽस्मिन् स्मृतिशास्त्राणां किं महत्त्वमस्ति ? स्मृतिशास्त्रैः के के लाभा भवन्ति ? एतेषां सर्वेषां प्रश्नानां निराकरणं स्मृतिग्रन्थेषु प्रस्थापितं वर्तते । समाजे याः क्षतीः पश्यामः, स्मृतिशास्त्रमेव ता दूरीकर्तुं समर्थमस्ति । ये जना निरन्तरं धनोपार्जनार्थमेव विचारयन्ति तान् सर्वान् जनान् महर्षयः कथयन्ति यद् –

---

[८] सु. र. भाण्डागारम् ३०।६

[९] सु. र. भाण्डागारम् ३१।६

सर्वे गुणाः काञ्चनमाश्रयन्ते[१०] ।

इति श्लोकस्य पादेन धनोपार्जनं प्रमाणीक्रियते । आधुनिके युगेऽस्मिन् युवकानां युवतीनां च चारित्र्यमशुद्धम्पश्यामः, कोऽपि जनः स्वचारित्र्यस्य रक्षणार्थं नैकानि पद्यानि स्मृतिशास्त्रं कथयति, कामानन्देनैव तृप्तानां यूनां कृते चारित्र्यरक्षणं दुष्करं वर्तते । तेभ्यो जनेभ्यो भर्तृहरिरनेन प्रकारेण कथयति यद् –

शीलं परं भूषणम्[११] ।

अनेन पद्येन कथयति यच्चारित्र्यरक्षणमेव हि श्रेष्ठतममाभूषणं वर्तते, यद्यस्माकं पार्श्वे चारित्र्याभूषणं वर्तते चेत्तर्हि भूषणैरन्यैः को लाभः ? कारणं चारित्र्याभूषणमेव देहस्य श्रेष्ठतममाभूषणं वर्तते, अनेन प्रकारेण शीलस्य महत्त्वम्प्रतिपादितमस्ति ।

इत्थं सर्वेभ्यो मानवेभ्यो नैकैः सुभाषितैः निरन्तरं सद्बोधं प्रददाति । ये निरन्तरं प्रतिदिनं च स्मृतिग्रन्थस्य पठनं कुर्वन्ति ते जनाः कदापि कुमार्गगामिनो भवितुन्नार्हन्ति, एतादृशैरनेकैः कारणैः परिचितो महर्षयः सर्वेषां मानवानां कल्याणार्थं दुर्लभमिदं स्मृतिशास्त्रनामानम् अतीवसुन्दरतमं ग्रन्थं रचितवान् । अनेन प्रकारेण आदर्शपदं व्याख्यायोपप्रकरमिदमत्रैव समाप्यते ।

१.२ आदर्शगुणस्य मानवजीवन आवश्यकता ।

किं नाम तीर्थम् ? इति प्रश्ने सति मानवः तरत्यस्मादिति तीर्थम् , इत्थं नैकानि तीर्थानि धर्म्मशास्त्रेष्वन्येषु च शास्त्रेषु प्रतिपादितानि सन्ति, तेषु पञ्च महातीर्थानि सन्ति, यैर्मानव ऐहिकं सुखमुपभुज्य परस्मिन्नपि सुखं प्राप्तुं शक्नोति, तेषां पञ्चानां महातीर्थानां नामानि पुराणेषु परिकीर्तितानि तथा विशेषरूपेण वर्णितानि सन्ति यथा –

(१) पितृरूपादर्शगुणः ।

(२) पतिरूपादर्शगुणः ।

(३) समतारूपादर्शगुणः ।

(४) अद्रोहरूपादर्शगुणः ।

(५) भक्तिरूपादर्शगुणः ।

एतेषां पञ्चानां महातीर्थानां विशेषदृष्टान्तेन धर्म्मशास्त्राणाम् अनुसारं विस्तारं करोमि यथा –

१. पितृरूपादर्शगुणः ।

एतेषु पञ्चसु महातीर्थेषु सर्वप्रथमं स्थानं पितृतीर्थमावहति, तस्य वर्ण्णनं कुर्वन् पुराणकारो लिखति यद् – नरोत्तमनामा कश्चिदेकः तपस्वी ब्राह्मणस्तपस्तप्तुं मातुः पितुश्च सेवामुज्झित्वा तीर्थयात्रार्थं निर्गतः, तीर्थसेवनस्य महिम्नः प्रभावेण क्लिन्नानि वस्त्राण्याकाशे शोषयन्ति स्म, अनेन चमत्कारेण मनस्यभिमानं समुत्पन्नम् , अत आकाशमवलोक्य कथयति स्म यद् – मम समानोन्यः कः तपस्वी ?

[१०] नीतिशतकम् श्लोकसंख्या ४१

[११] नीतिशतकम् श्लोकसंख्या ५६

यस्य वस्त्राण्याकाशे शोषयितुं समर्थः ? वाक्यमिदं समाप्तमेव न भवति, ततः पूर्वमेव तस्य मुखे बकेनैकेन शकृद्भागः पातितः, तदा क्रोधेनानेन ब्राह्मणेन शापः प्रदत्तः, येन स भस्मतां गतः, अनेन शापेन ब्राह्मणस्य तपस्या नष्टा, येन तस्य वस्त्राण्याकाशे शोषितानि भवन्ति, तानि शान्तानि जातानि, अनया घटनया ब्राह्मणो वेदनां प्राप्तः, तदाकाश आकाशवाणी जाता यद् - हे ब्राह्मण ? त्वं मूकचण्डालस्य समीपं गच्छ, स धर्मज्ञानं कारयिष्यति, तदा स मूकचण्डालो मातृपितृसेवायां तन्मय आसीत् , अनया सेवया प्रसन्नो विष्णुः तस्य निवासं करोति स्म, तस्य मूकचण्डालस्य गृहं स्तम्भैर्विनाकाशे स्थानं करोति, तद् दृष्ट्वा ब्राह्मणो महाश्चर्यचकितो जातः, तदा ब्राह्मणः श्रुतामाकाशवाणीं तामश्रावयत् प्रार्थयच्च यद् - भवान् ज्ञानं मह्यं प्रयच्छतु , तदा मूकचाण्डालेन कथितो यत् - प्रतीक्षां करोतु, यदा मम सेवया पितरौ सन्तुष्टौ भविष्यतः, तदा भवतः सेवां करिष्यामि, इति श्रुत्वैव क्रुद्धो भूत्वा तमनिन्दत् , अन्ते मूकचाण्डालेन कथितं यद् - अहं बको नास्मि, येन त्वया प्रज्वलितोहं नाशं गमिष्यामि[१२] । इत्थं पितृतीर्थस्य महिमानं श्रुत्वा पतितीर्थस्य दृष्टान्तं श्रावयति, अनेन प्रकारेण मातरं पितरं विहाय श्रेष्ठतमं प्रेष्ठतमं च तीर्थं संसारेस्मिन् न वर्तते ।

२. पतिरूपादर्शगुणः ।

एतेषु पञ्चसु महातीर्थेषु द्वितीयं स्थानं पतितीर्थमस्ति, तस्य विशेषदृष्टान्तेन धर्म्मशास्त्रानुसारं विस्तारं करोमि यथा - नरोत्तमनामा ब्राह्मणं पृष्टवान् यत् - त्वं सन् ब्राह्मणोपि कथं चाण्डालस्य गृहं निवससि ? तदा स्वयं भगवान् कथयति यत् - सम्प्रति तव अन्तःकरणं पवित्रं नास्ति, पश्चात् त्वां ज्ञास्यसि । भगवान् पतिव्रतायाः सम्बन्धे नरोत्तमं कथयन् तस्य शक्तीनां प्रशंसां कृतवान् , यदा पतिव्रताया गृहं पार्श्वे आगतवान् , तदा भगवानदृश्यो जातः, नरोत्तमेन पतिव्रताया गृहे ब्राह्मणो दृष्टः, नरोत्तमः पतिव्रतां प्रार्थयति यत् - त्वं मह्यं धर्मस्योपदेशं प्रददातु । पतिव्रता निवेदितवती यद् - मम पतिसेवा सार्धा वर्तते, तां पूरयित्वा भवतः सेवां करिष्यामि, तावत्कालपर्यन्तं जलपानं कृत्वा विश्रामं करोतु , इति श्रुत्वैव क्रुद्धो नरोत्तमः तस्यै शापार्थं सज्जो जातः, तदा पतिव्रता कथितवती यद् - हे महाराज ! पुत्रवन्मातृपितृसेवातः श्रेष्ठधर्मो नास्ति, तथैव स्त्रीणां कृते पतिसेवातः श्रेष्ठो धर्मो नास्ति, अतः पतिं सेवाया सन्तोषयिष्यामि, तदनन्तरं भवतः सेवां करिष्यामि, चेच्छ्रीघ्रं वर्तते तर्हि भवान् वैश्यस्य पार्श्वे गच्छतु, तदा नरोत्तमनामा ब्राह्मणो वैश्यसमीपं गतः । इत्थं पतितीर्थस्य महिमानं श्रुत्वा वैश्यः समतातीर्थस्य दृष्टान्तं श्रावयति, अनेन प्रकारेण स्त्रीणां कृते पतिं विहाय श्रेष्ठतमं प्रेष्ठतमं च तीर्थं संसारेस्मिन् न वर्तते[१३] ।

३. समतारूपादर्शगुणः ।

एतेषां पञ्चानां महातीर्थानां विशेषदृष्टान्तेन पुराणानुसारं विस्तारं करोमि यथा - ब्राह्मणरूपधारी भगवान् नरोत्तमस्य पार्श्वे गत्वा अकथयत् , हे

[१२] पुराणकथाङ्कः पृ. सं. ३७६

[१३] पुराणकथाङ्कः पृ. सं. ३७६

ब्रह्मन् ! भवान् चलतु , अहं तुलाधारस्य समीपं गच्छामि, यदा तौ द्वौ तुलाधारस्य पार्श्वे गतवन्तौ तदा नैके पुरुषाः, नैकाः स्त्रियः तुलाधारमभित आसन् । ब्राह्मणमवलोक्य तुलाधारेण मिष्टया वाण्यापृ च्छद्यद् - हे द्विजश्रेष्ठ ! भवत आगमनं कथमत्र संजातम् ? तदा ब्राह्मणोवोचत् , भवान् मह्यं धर्मस्य उपदेशं ददातु , तदा तुलाधारोकथयत् , हे महाराज ! अहं वैश्योस्मि, व्यापार एव मम मुख्यो धर्मो वर्तते, तत्समाप्तावेव भवतः सेवां करिष्यामि, अतो भवान् धर्मस्य समीपं गच्छतु , अहं व्यापारकर्मणि सम्प्रति प्रवृत्तोस्मि, अनेन प्रकारेण व्यापारेषु कर्मसु समरूपेण परमेश्वरस्य सेवां कुर्वनासीत् । तदा नरोत्तमः ततो गतवान् , नरोत्तमो ब्राह्मणरूपधारिणं भगवन्तमपृच्छत् , तुलाधारस्य पार्श्वे का विशेषता वर्तते ? स्वयमेव भगवानकथयद्यद् - सः तुलाधारः स्वस्मिन् वैश्यकर्मणि प्रवृत्तः सर्वेषु प्राणिषु निवसन्तं भगवन्तं स्मारं स्मारं वैश्यधर्मस्य व्यावहारिकोपदेशं ददाति । अनेन प्रकारेण प्रातरारभ्य रात्रिपर्यन्तं सर्वेषां प्राणिनां हितं कुर्वन् स्वं कर्म करोति[१४] ।

४ अद्रोहरूपादर्शगुणः ।

एतेषां पञ्चानां महातीर्थानां विशेषदृष्टान्तेन पुराणानुसारं विस्तारं करोमि यथा - नरोत्तमो ब्राह्मणं धर्माचरविषयकमपृच्छत् , तदा भगवानकथयत् - एकस्मिन् समये राजकुमारस्यैकस्य बहिर्गमनस्येच्छा जाता, किन्तु स्वपत्नीनां सुरक्षासम्बन्धिनी महती चिन्तासीत् , अतः पुरुषस्यैकस्य समीपं गत्वा कथितवान् यद् - भवान् षण्मासान् यावन्मम पत्न्या रक्षाया भारं वहतु , तदा सः पुरुषः कथयति यद् - अहं भवतां स्वजनो नास्मि, तथापि मम पार्श्वे स्वपत्नीमुत्सृज्य कथं निश्चिन्तो वर्तते, तदा तेन राजकुमारेण कथितं यद् - अहं भवतां चरित्रेण सुपरिचितोस्मि तथा निश्चिन्तो भूत्वैव पुनरायास्यामि, तदनन्तरं षण्मासपर्य्यन्तमखण्डं ब्रह्मचर्यं परिपाल्य पथ्यागच्छान्नासीत् , तदा पथिकैकेन कथितं यद् - हे भ्रातः ! त्वया स्वपत्नी पुरुषायैकस्मै प्रदत्ता, सः पुरुषः केन प्रकारेण तस्या सुचारु व्यवस्थां कृतवान् ? इति पथिकयोर्वार्तामिमां श्रुत्वा लोकापवादं दूरीकर्तुं द्वारस्य पार्श्वे काष्ठानि प्रस्थाप्य तानि काष्ठानि प्रज्वालितानि, तस्मिन्नेव समये राजकुमारः तत्रागतः, राजकुमारः स्वपत्नीमवलोक्य प्रसन्नो जातः, किन्तु सः पुरुषः चिन्तामग्नः, तदा राजकुमारः कथितवान् यद् - हे मित्र ! बहूनां दिवसानामन्ते पुनरागतः, कथं त्वं वार्तामेकां न करोषि ? तदा सः पुरुषः कथयति यद् - लोकापवादेन मया कृतं सर्वं नष्टं संजातम् , अतोहमग्निम्प्रविशामि , देवता मनुष्याश्च मम कार्यमवलोकयिष्यन्ति, इत्युक्त्वा सः पुरुषोग्नौ प्रविष्टवान् किन्तु तस्य पुरुषस्य केशा अपि न नष्टाः, आकाशाद् देवताः तस्मै साधुवादान् प्रददतः पुष्पवृष्टिमकुर्वन् , यैः पुरुषैः तस्य पुरुषस्य सम्बन्धिनी किंवदन्ती कृता, तेषां मुखे कुष्ठरोगो जातः, देवताः स्वयमागत्य तस्मादग्नितो तं पुरुषं निष्कासितवन्तः, तथा मालार्पणं कृतम् , ततः सः पुरुषः सज्जनाद्रोहको जातः, कथं यत् - सः कदापि द्रोहं न करोति स्म, शत्रुतोपि प्रेमपूर्वकं व्यवहारं करोति स्म । देवतास्तं राजकुमारमकथयन् - त्वं स्वपत्नीं स्वीकुरु, अस्मिन्नेव समये तस्मात्सज्जनाद्रोहतः श्रेष्ठो नान्यो जातः, येन कामलोभयोरुपरि विजयः सम्प्राप्तः, देवताः तस्य प्रशंसां कृतवन्तः तथा विमानमुपविश्य सर्वे देवा देवलोकं गतवन्तः , स राजकुमारः स्वयं कृतज्ञतां प्रकटय्य पत्न्या सह

---

[१४] पुराणकथाङ्कः पृ. सं. ३७६

राजभवनमगच्छत् । स्वयं भगवता यदा कथेयं समाप्ता, तदा तस्य गृहं समीपमागतम् । भगवान् नरोत्तममद्रोहस्य पार्श्वे प्रेषयित्वा अन्तहितो जातः, नरोत्तमेनाद्रोहस्य समीपं धर्मसम्बन्धिनो जिज्ञासा कृता , अद्रोहकेण नरोत्तमस्यातिथ्यं कृत्वा व्यज्ञापयद् यत् – सम्प्रति भवान् वैष्णवसज्जनस्य पार्श्वे गच्छतु, तत्रैव सर्वाः कामनाः पूर्णा भविष्यन्ति ।

५. भक्तिरूपादर्शगुणः ।

एतेषां पञ्चानां महातीर्थानां विशेषदृष्टान्तेन पुराणानुसारं विस्तारं करोमि यथा – नरोत्तमो वैष्णवस्य गृहं प्रति गतः तदा ब्राह्मणरूपधारिणं भगवन्तं पुनरमिलत् । नरोत्तमो भगवन्तमपृच्छद् यद् – यस्य वैष्णवसज्जनस्य गृहमावां गच्छावः, तस्य का विशेषता वर्तते ? भगवता विज्ञातिं यद् – वैष्णवो भगवत उपर्यनन्यं प्रेम करोति, अतो भगवान् तस्य गृहे स्वयमेव विराजते, यदा तस्य गृहमागतं तदा भगवान् स्वयमन्तर्हितो जातः । नरोत्तमेन वैष्णवसज्जनस्य समीपं जिज्ञासा प्रकाशिता, तदा वैष्णवेन कथितं हे विप्रवर ! भवन्तमवलोक्य मम हृदि आनन्दो जातः, तवोपरि भगवान् विष्णुः प्रसन्नो भवतु, अतः तव सर्वाः कामनाः सफला भविष्यन्ति, मम गृहमन्दिरे भगवान् विष्णुः साक्षाद् विराजमानो वर्तते, भवान् दर्शनं करोतु , यदा ब्राह्मणो गृहमन्दिरं गच्छति यद् – स एव ब्राह्मणः कमलासनस्योपरि विराजमानो वर्तते, तं नरोत्तमः साष्टाङ्गं प्रणम्य कथितवान् , यदि भवान् प्रसन्नो वर्तते तदा स्वस्य स्वरूपदर्शनं ददातु । भगवान् नरोत्तमस्येमां प्रार्थनां श्रुत्वा नरोत्तमाय दिव्यरूपं प्रदर्श्य तृप्तो जातः । भगवान् स्वयमकथयत् – भक्तानामुपरि मम प्रेम सदा वर्तते, प्रेमकारणेनैव त्वां पुण्यशालिनां पुरुषाणां दर्शनमकारयत् , त्वयैकः त्रुटिः कृता यत् – त्वं पित्रोरादरं नाकार्षीः, अतः त्वं गत्वा पित्रोः पूजां कुरु, तयोदुःखेन क्रोधेन च तव तपस्या नष्टा भवति, यं पितरौ क्रुध्यतः, स नरकं गच्छति, त्रिदेवा अपि तं नरकाद् रक्षितुमसमर्थाः सन्ति, अतो गृहं गत्वा पितरौ मम मूर्तिं विज्ञाय मत्वा वा पूजय, तयोः कृपया त्वं मामवश्यं प्राप्स्यसि । तदा स नरोत्तमः पितरौ भगवतो रूपं मत्वा सेवां शुश्रूषां च विधायान्ते च परमां गतिमवाप । अतो मातृपितृसदृशमेकमपि तीर्थमस्मिन् जगति न वर्तते ।

अनेनैवाचरणेन मानव आदर्शो भूत्वा स्वकुटुम्बं स्वदेशं स्वसंस्कृतिं च पालयति, अतो मानवानां जीवने समेषामादर्शगुणानां महत्यावश्यकता वर्तते, एतेषां समेषां गुणानामाधानं तु विविधाः स्मृतय एव कर्त्तुं शक्नुवन्ति ।

१.३ मनुष्यजीवनतत्त्वम् ।

सृष्टित आरभ्य मोक्षप्राप्तिपर्यन्तविचारो वर्तते, अहं ब्रह्मास्मि, तत्त्वमसि, प्रज्ञानं ब्रह्म, अयमात्मा ब्रह्म, आनन्दो वै ब्रह्म इति पञ्चमहावाक्यानां ज्ञानमनेनैवैताभिः स्मृतिभिरेव भवति, तथैवापराणि शास्त्राण्यपि पृथक्पृथक्कथयन्ति यथा –

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते[१५] ।।

---

[१५] वाक्यपदीयम् १।१३

अर्थस्य प्रवृत्तिर्व्यवहारस्तस्य निमित्तानि तत्त्वानि पदार्था विवक्षारूपाः, तेषां निबन्धनं निमित्तं शब्द एव । अर्थस्य वस्तुस्वरूपतया सत्त्वमसत्त्वं वा न प्रवृत्तितत्त्वम्, किन्तु विवक्षैव, यतो लोके विवक्षयैवार्थे शब्दप्रयोगरूपो व्यवहारो दृश्यते, न तु वस्तुस्वरूपस्य सत्वेनासत्वेन वा । विवक्षाणां निमित्तं शब्दा एव, यतः प्रयोक्ता तदर्थविवक्षाप्रतिपादनयोग्यं हि शब्दं विवक्षाप्रापितसन्निधानेष्वभिधेयेषु प्रत्यर्थमुपादत्ते । तद् यथेन्द्रियेयमुपलब्धौ प्रतिधत्ते, न रूपोपलब्धेः श्रोत्रमिति, एवं तदर्थाभिधानयोग्येनैव शब्देन तमर्थं विवक्षतीति, यथा –

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते[१६] ।।

तद्व्याकरणमपवर्गस्य मोक्षस्य द्वारं प्राप्त्युपायः । तथाहि – ज्ञानात्मना स्थितस्य शब्दस्वरूपतः स्वात्मना सहाभेदतत्त्वज्ञो व्याकरणवर्ण्णानुपूर्व्यादिक्रमविशिष्ट- साधुशब्दप्रयोगज्ञानपूर्वकं तत्र वर्णानुपूर्वीरूपक्रमपरिहारेण स्वात्मनि योगं निर्विकल्पं लभते । ततश्च निःश्रेयसप्राप्तिरित्येकः प्रकारो व्याकरणस्य मोक्षप्राप्त्युपायत्वे । व्याकरणज्ञानेन साधुशब्दप्रयोगादभिव्यक्तपुण्यविशेषः, तत्प्रभावेण ज्ञानक्रमेण महान्तं शब्दात्मानं सर्वेषामन्तरवस्थितमात्मभूतमात्मतया साक्षात्कारेण तद्रूपतामापद्यमानः, वैकरण्यं जीवन्मुक्तिकाले करणसम्बन्धाभिमानराहित्यं, विदेहकैवल्ये च सर्वकरणराहित्यरूपं मोक्षं प्राप्नोतीत्यपरः प्रकारः । स वैयाकरणोऽव्यतिकीर्णां कत्वखत्वादिपदत्ववाक्यत्वादितारमन्द्रत्वादि- वर्णानुपूर्व्यादिभिर्धर्मैः सङ्कीर्णां वागवस्थां स्फोटाख्यां मध्यमां वैखरीज्ञानात् परमधिगम्य तदनु सर्वेषां वाग्विकाराणां प्रकृतिं प्रतिभाख्यां परेति प्राप्नोति ।

तथा हि – येयं समस्तशब्दार्थकारणभूता बुद्धिः, यां पश्यन्तीत्याहुः, यतः शब्दाः प्राणवृत्तिमनुपतन्ति, तां प्रतिभां क्रमेणानुप्राप्नोति वैयाकरणो वाङ्मलानां चिकित्सितम्, आयुर्वेद इव शारीराणां दोषाणाम् । अतो मानवश्चतुरशीतियोनितो मुक्तत्वमेवादर्शमनुष्यस्य जीवनतत्त्वं वर्तते, तत्तु विविधानां स्मृतीनामात्मसाक्षात्कारेणैवैहिकसुखानि भुक्त्वा मोक्षमवाप्नोति । अनेन प्रकारेण सम्पूर्णे द्वितीयप्रकरण आदर्शमनुष्यजीवनस्य तत्त्वं व्याख्याय नैकेषां स्मृतिग्रन्थानामामुखं विवेचनं प्रकृत्य विस्तारभयाद् विशेषमुल्लेखमत्र न करोमि ।

[१६] वाक्यपदीयम् १।१४

# श्रीमद् भागवतपुराणमें भाव एवं रस व्यंजना

डॉ.महेन्द्रकुमार ए.दवे
एसोसियेटप्रोफेसर,साहित्यविभाग
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावळ

10

श्रीमद् भागवतमें दार्शनिकविचार की शृँखला दिखाई पडती हैं । दर्शन का उद्देश जीवन और विश्व का यथार्थ ज्ञान प्राप्त करना हैं । ज्ञान मनुष्य की सर्वश्रेष्ठ निधि होनेके कारण मनुष्य और पशुमें भेद हैं । धर्म और दर्शन में केवल इतना भेद हैं कि दर्शन अपने ही विचारों और कल्पनाओंका फल हैं । धर्म दूसरों के काल्पनिक विचारो में अन्धविश्वास और श्रद्धा को अनुमोदन देने वाला हैं दोनों ही कल्पनाके आधार पर स्थिर हैं । किन्तु 'श्रीमद् भागवत पुराण' भक्तिका श्रेष्ठतम ग्रन्थ होने के साथ साथ काव्यके महत्त्वपूर्ण तत्वों एवं गुणो से परिपूर्ण हैं । यह कविके भावुक और प्रतिभाशाली हृदयका मूर्त्त स्वरूप काव्य हैं । उसके सृजनमें जिन प्रमुख तत्त्वों का आश्रय लेना पडता हैं । वें भावतत्व एवं कल्पना तत्त्व कहे जाते हैं । विद्वानोंने इन्हे भावपक्ष और कला दो भागो में विभक्त किया हैं जिसे अनुभूति और अभिव्यक्ति पक्ष भी कहा जाता हैं । भावतत्त्व रागात्मक तत्त्वको कहते हैं ।जो सहृदयों के मनोवेगों को तरंगित करता हैं वस्तुत: भाव-सौन्दर्य और रसानुभूति काव्य का प्राणतत्त्व हैं । कवि अनुभूत भावो को कल्पना के सौन्दर्य से अभिव्यक्ति पदान करके उसे रसमय काव्य का रूप देता हैं ।

साहित्य सृजन करने वाले कवि के कवित्त्वका मूलाधार भाव हैं । डॉ.त्रिगुणायत ने कहा हैं-'कविकी संस्कार जन्य प्रतिभा जीवनके विविध वातावरणों के मार्मिक चित्रोको आत्मसात् करती रहती हैं । भाव या मनोवेगों के किसी विशेष उद्रेक द्वारा यह एकत्रित चित्र वाग्धारा के माध्यमसे काव्यका निर्माण करते हैं । काव्यमें बुद्धि सदैव भावानुगामिनी रहती हैं यद्यपि विद्वानोंने भिन्न-भिन्न तत्त्वोंकी महत्ता भिन्न-भिन्न प्रकार से स्वीकार की हैं तथापि काव्यमें भावोंका होना स्वभाविक एवं अपेक्षित हैं ।

भागवत की भाषामें अन्य पुराणे जैसी सरलता होने के बावजूद भिन्न भी लगती हैं । सामान्यत: कहा जाता हैं कि भागवतके समयमें संस्कृत जीवन्त भाषा नहीं थी । श्री चिन्तामणि वैद्य 'The date of the Bhagavata' लेखमें इसका विरोध करते हुए बारहवी शताब्दीका जयदेव रचित गीतगोविंदका उदाहरण देते हैं और कहते हैं कि “Hence it would be quite improper to call it a product of the age of decadence” डॉ.वीन्टरनीड्झ इसकी भाषाका मूल्यांकन करते हुए कहते हैं कि “It hears the Stamp of a unified Composition and deservers to be appreciated as Literary Production on account of its Language , Style and Metre”[१]'

भाव' शब्द का सर्वप्रथम विवेचन भरतमुनिने अपने गन्थ ”नाट्यशास्त्र”में किया हैं । उनके अनुसार भावित करें वे भाव हैं । भाव मानसारोवर में क्षण-क्षण उत्पन्न होने वाले बुलबुले हैं । मानव हृदय विविध प्रकार के भावों से परिपूर्ण हैं । लेखन कला के लिये भाव विचार कल्पना आवश्यक तत्त्व हैं । सामान्य कोटिका लेखक भी भावों के माध्यम से जन-समाज को प्रभावित करने की क्षमता रखता हैं । तब देवस्वरूप भगवान् 'व्यास' द्वारा रचित “भागवत पुराण” बहुमूल्य भावरत्नों से पूर्ण सागर ही हैं । भाव सौंदर्य जहाँ जीवन को अखण्डता और एकता का प्रतिष्ठाता हैं वहाँ आनन्द का प्रचार कर्ता भी हैं । महामुनि व्यास की भावानुभूति का क्षेत्र अत्यन्त व्यापक हैं । भावोंका सुन्दर सामंजस्य श्रीमद् भागवतमें लक्षित हैं । भाव-सौंदर्यके मूलत: दो रूप हैं । १.- भाव निरूपण और २.- रस निरूपण

१.- History of Indian Litareture, Vol.-1-pp.556

काव्य या साहित्य का मूलतत्त्व भाव ही हैं । सामान्य प्राणी भी भावोंसे ओतप्रोत रहता हैं लेकिन जहॉं अनुभूति ,अभिव्यक्ति की तीव्रता हो जाती हैं तब भाव कवि हृदय का स्पर्श करने लगते हैं। श्रीव्यास के कवि हृदयसे अनेक भावों का वर्णन श्रीमद् भागवतपुराणमें समष्टि रूपमें विभिन्न प्रसंगो और भिन्न-भिन्न स्थितियों में मिलता हैं। मन के अनुकूल पदार्थो में सुखानुभूति ही 'रति' कहलाती हैं। प्रेम या रति ऐसा व्यापक भाव हैं जिससे प्राणिमात्र प्रभावित हुए बिना नहीं रह सकता , मानव ही नहीं देव और ऋषिमुनियों के हृदयमें भी रति भाव सहज रूपमें वर्तमान रहता हैं। श्री कन्दर्प के हृदयमें देवहूति के प्रति रतिभाव जन्म लेता हैं जिसे देखकर विश्वावसु गन्धर्व अचेत् हो गया था। २

भागवत के वर्ण विषयकी गरिमा ,विस्तार एवं व्यापकता जैसे काव्य के श्रेष्ठ रसमय काव्य सिद्ध करते हैं। भागवत वेदरूपी वृक्षका सुपरिपकव सुस्वादिष्ट फल हैं।३ दशम स्कन्ध शृङ्गारिक भावों का कोश ही हैं। गोपीयों का जीवन भगवानकी रति हैं। अपने सौन्दर्य और लीलाओंसे कृष्ण ने सभी गोपीयों में ऐसी प्रेमानुभूति जाग्रत की हैं जिसकी अनन्यता और समर्पण भावना ने उन्हे अमर प्रेमिका बना दिया।

'भागवतपुराण'में मानव हृदय के सभी भावोंका समाहार किया गया हैं ।'उत्साह'जीवन का अनिवार्य भाव हैं इससे अभावमें जीवन व्यर्थ हैं। इसके अनेक क्षेत्र हैं। युद्धादि में यह भाव विशेष रूपसे लक्षित होता हैं। यद्यपि 'भागवत पुराण'में भक्ति की प्रधानता हैं तथापि अन्य भावोंका भी यथोचित् प्रसंग वर्णन किया हैं। भावोंकी निष्कृष्टतम और श्रेष्ठतम दोनों प्रकार से अभिव्यक्ति की गयी हैं। हृदय के तुच्छ रूपको व्यक्त करने वाले ईर्ष्या,द्वेष, लोभ आदि भाव हैं । उसी प्रकार त्याग,दान,प्रेम,सेवा आदि ऐसे भाव हैं जो मानवको देवत्व स्तर पर प्रतिष्ठित कर देते हैं।

भागवत की भाव व्यञ्जना के सौन्दर्यका क्षेत्र अत्यन्त व्यापक हैं क्योंकि व्यासकी अनुभूतिका क्षेत्र भी असीमित और विस्तृत हैं। उनके हृदय सागरमें आविर्भूत अनेक भावऊर्मि भागवतके विभिन्न स्थलों पर अभिव्यक्त हैं।

भागवतकारने भक्ति-भावनाको मूलाधार बनाया हैं इसलिये अनेक भावोंका रमणीय और सुन्दर चित्रण होते हुए भी उनका समाहार भक्तिके केन्द्रीय भावमें निहित हैं। जिस कविमें चिन्तन और अनुभव कल्पना शक्ति जितनी अधिक मात्रामें होगी उसका भावैसौन्दर्य भी उतना ही प्रभावपूर्ण होगा। महान् कवियों में एक व्यासजी ने अपनी साधना से समस्त ज्ञान- भक्ति को प्राप्त कर लिया था। इसलिये वे भाव जगत् को विस्तार देने में समर्थ हुए। काव्यका मूल सौन्दर्य भावों की अनुभूतियॉं में हैं जो बाह्य जगत के संवेदन से हृदयजगत् के अंतर्गत विविध मनोवेगों के रूपमें तरंगित रहते हैं। भागवत में भारतीय चेतना का गौरव भक्तिके आलोकमें मानवों का पथ प्रदर्शक हैं। अत: इसकी समस्त भावनायॅं उदात्त स्वरूपमें संचरित हुई हैं । अत: इसका भाव सौन्दर्य व्यक्तित्व की दृष्टि से सफल और सरस हैं।वस्तुत:भागवत की सृष्टि ही भाव सौन्दर्य पर आधारित हैं जो कवि के रागतत्त्व से प्रेरित हुई हैं । भागवत की कथावस्तु परमानन्ददायी होने को कहा हैं।४ भारतीय साहित्यकी आधारशीला रस सिद्धांत हैं। काव्यनन्द को ब्रह्मानन्द सहोदर कहा हैं क्योंकि वह लोकोत्तर आनन्द हैं।५ भरतमुनि रससिद्धांत का प्रेरक हैं जिन्होंने साहित्यमें रस को आत्मा माना हैं । भागवतमें भक्ति को उत्तम रसके रूपमें स्थान दिया हैं। भगवत लीला का स्मरण मानवीका परम कर्तव्य हैं।

---

२.- यां हर्म्यपृष्ठे क्वणदड घ्रिशो मां विक्रीडतीं कन्दुक विहलाक्षीम।
विश्वावसुर्न्यपतत्स्वाद्विमाना द्विकोक्य सम्मोह विमूढ चेता : ॥
- श्रीमद् भागवत पुराणम्- २-२३-१७

३.- निगम कल्प तरोर्गलितं फलं ........ शुकमुखादमृतद्रवसंयुतम् ॥ - श्री भागवतपुराणम्- १-१-३

४.- तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जना: ॥
- भागवतपुराणम्- १०-३१-८.

५.- काव्यप्रकाश- सं. श्रीनिवासशास्त्री,पृ.- १३३.

पंचम स्कन्धमें श्रीकृष्ण प्रति मनकी सतत गतिकी आसक्तिको भक्ति माना गया हैं। भागवतमें चौषठ प्रकारकी भक्तिका सुन्दर वर्णन मिलता हैं। भक्तिके अलावा अन्य रसोंका भी समुचित परिपाक हुआ हैं।६ तथा शृङ्गारको रसराज कहा हैं ।७ श्रीमद् भागवत कृष्ण प्रेमका स्पर्श किया हैं जिसे श्रीकृष्ण की मधुर चेष्टाओं और मधुर मुस्कानने परिपकव बना दिया हैं ।'रास पञ्चाध्यायीमें शृङ्गारका सुन्दर रूप प्रस्तुत किया गया हैं।८ शृङ्गारका लौकिक रूप दिखाकर भागवतककारने अन्तमें देवताओं के द्वारा पुष्पवृष्टि कराकर अलौकिकता प्रदान की हैं। भागवतमें विप्रलम्भ शृङ्गार का रूप भ्रमरगीत के अन्तर्गत

मिलता हैं । 'श्रीव्यास'का धर्म,भक्ति और मर्यादाका आदर्श स्थापित करना हैं ।अत: भागवतका शृङ्गार वर्णन अद्वितीय और लोकोत्तर हैं ।इसके अलावा करुण, रौद्र,वीर , भयानक, अद्भूत ,शान्तादि रसोंका वर्णन भी भागवतमें मिलते हैं। भक्तिभावके साथ वात्सल्य रस की अद्भूत सृष्टि'भागवत'में वर्तमान हैं । कृष्ण की बाल लीलाओंमें वात्सल्य पूर्ण क्रोध हैं। फिर भी भागवतका मूलतत्त्व भक्ति होने से इसमें सभी रसों का समाहार हो जाता हैं

संक्षेपमें कहा जाये तो श्रीमद् भागवत 'भाव –रस व्यंजना तथा भक्तिकी दृष्टिसे सफल और भावपूर्ण रचना हैं। जिस प्रकार व्यासने भावोंकी अभिव्यक्ति में व्यापकता ,सरसता और मार्मिकता प्रस्तुत की हैं ।उसी प्रकार उसकी रसानुभूति भी दिव्य एवं सहज हैं। श्रीमद् भागवत कृष्णलीलाओं से पूर्ण हैं गोपी विहार या रासक्रीडामें शृङ्गाररस का पूर्ण परिपाक हुआ हैं। वेणुगीतमें उस प्रेमका स्पर्श किया हैं जिसे श्रीकृष्णकी मधुर चेष्टाओं और मधुर मुस्कानने परिपकव बना दिया हैं । 'रास पञ्चाध्यायी'में शृङ्गारका सुन्दररूप प्रस्तुत किया गया हैं।

---

६.- वयं तु न विस्तृप्याम उत्तमश्लोक विक्रमे ।
यच्छ्रुण्वतां रसज्ञानां स्वादु-स्वादु पदे पदे ॥-भागवत पुराण- १-१-१९

७.- शृङ्गारप्रकाश:- खण्ड-१

८.- भागवतपुराण – १०-२०-३/४

11

# वामनोक्तरीतिगुणविमर्शः ।

हार्दिकः जी. जोषी

दर्शनम् संस्कृतमहाविद्यालयः,एस.जी राजमार्गः, कर्णावतीनगरम्, 382 481.

**।। शोधसारः ।।**

शोधपत्रेऽस्मिन् वामनप्रणीतकाव्यालङ्कासूत्रेषु रीतिगुणविचारः चर्चितोऽस्ति । तत्र भवन्तो भवन्तः शोधपत्रेऽस्मिन् इमे बिन्दवः ज्ञास्यन्ति । तत्र प्रमुखाः बिन्दवः यथा -

- वामनोक्तं रीतिलक्षणम् ।
- वामनोक्तरीतिप्रकाराः ।
- विशिष्टरीतिनां विभिन्नानि उदाहरणानि ।
- वामनोक्तगुणलक्षणम् ।
- वामनोक्तदशगुणाः ।
- अर्वाचीनालङ्कारिकाणां मते गुणसंख्याख्यापनम् ।

## ।। वामनोक्तरीतिगुणविमर्शः ।।

साहित्यशास्त्रं शास्त्रान्तराणीव परमोपदेयं शास्त्रम् । वैदिकानां लौकिकानाञ्च शास्त्राणां सर्वाङ्गीणतया ज्ञानं तावन्न भवितुमर्हति यावत् साहित्यशास्त्रज्ञानं न स्यात् । वेद-वेदाङ्गादिषु - **'उत त्वः पश्यन् न ददर्श वाचम्...','जायेव पत्ये उषती सुवासाः', 'द्वा सुपर्णा सयुजा सखायाम्'**इत्यादिकानि सन्ति सहस्राणि वाक्यानि एतादृशानि, येषां भावान् न साहित्यशास्त्राभिज्ञो ज्ञातुं प्रभवति । अथ च यो जनः साहित्यशास्त्रे न निष्णातोऽस्ति सः व्यञ्जनाप्रतिपाद्यमानान् भावान् अर्थान् अपि नावबोद्धुं शक्नोति । अतः तदावश्यकतापूर्तौ साहित्यशास्त्रे षट् संप्रदायाः संशोश्रुयन्ते । ते च –

| | |
|---|---|
| 1. रससंप्रदायः | 4. अलङ्कारसंप्रदायः |
| 2. रीतिसंप्रदायः | 5. औचित्यसंप्रदायः |
| 3. ध्वनिसंप्रदायः | 6. वक्रोक्तिसंप्रदायः । |

तत्र वयमत्र रीतिसंप्रदायमाधारिकृत्य तथा च रीतेः साक्षात् सम्बन्धो वर्तते गुणैः सह। अतः रीतिगुणमाश्रित्य यथा किञ्चित् प्रस्तूयतेऽत्र ।

तत्र रीतिसंप्रदायस्य प्रमुखप्रतिपादतः प्रधानाचार्यः वामनः । एतन्मते रीतिरेवकाव्यस्यात्मा । उक्तञ्च तेन स्वग्रन्थे **'रीतिरात्मा काव्यस्य'**[1]तत्र का च सा रीतिरिति जिज्ञासायां वामनः वक्ति यत् **'विशिष्टपदरचना रीतिः'**[2] इयमेव शैलीत्युच्यते कुत्रचित् । रचनायां चेयं विशिष्टता गुणानामवस्थित्या उत्पन्ना भवति । अत एव गुणोपरि रीतिरवलम्बिता । इदं रीतिमतं गुणसम्प्रदायनाम्नापि व्यवह्रतं भवति । तत्र रीतयः कति ? काश्च ताः प्रश्नस्वस्यास्योत्तरं वामनः इत्थं प्रस्तुतवान् - **'सा त्रेधा वैदर्भी गौडीया पाञ्चाली चेति'**[3]।सा च त्रिधा ।

1. वैदर्भीरीतिः

2. गौडीयारीतिः

3. पाञ्चालीरीतिः ।

**'सकलगुणसध्रीचीनत्वेनाभ्यर्हितत्त्वाद् वैदर्भ्याः प्रथमं निर्देशः। अनन्तरयोरुभयोः स्तोकगुणत्वेऽपि प्रशस्तगुणसंस्कृतत्त्वात् अनन्तरं गौडीयायाः अवशिष्टाया अन्ते निवेशः'**[4]।

तत्र च वैदर्भी - **'समग्रगुणा वैदर्भी'**[5]।समग्रैरोजःप्रसादप्रमुखैः गुणैरुपेता वैदर्भीनाम रीतिः । उक्तरञ्च तत्रैव –

**अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता ।**

**विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ।।**

तदुदाहरणं यथा - **'गाहन्तां महिषा निपानसलिलं श्रृङ्गैर्मुहूस्ताडितम्...'**[6] । मध्यमा च गौडीया । तद्यथा –**'ओजः कान्तिमती गौडीया'**[7] । ओजः कान्तिश्च विद्येते यस्यां सा ओजःकान्तिमती, गौडीया नाम रीतिः । माधुर्यसौकुमार्ययोः अभावात् रसमासबहुला अत्युल्बणपदा चेयं रीतिः । तदुदाहरणं यथा –

**दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत- ।**

**ष्टकारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।।**

---

1काव्यालङ्कारसूत्रम् । (6/2/1)

2काव्यालङ्कारसूत्रम् ।(7/2/1)

3काव्यालङ्कारसूत्रम् ।(9/2/1)

4काव्यालङ्कारसूत्रस्य कामधेनुटीकायाम् ।

5काव्यलङ्कारसूत्रम् ।(11/2/1)

6अभिज्ञानशाकुन्तलम् ।(6/2)

7काव्यालङ्कारसूत्रम् ।(12/2/1)

तृतीया च पाञ्चाली । तल्लक्षणमित्थं लक्षितमाचार्यवामनेन - **'माधुर्यसौकुमार्योपपन्ना पाञ्चाली'**[8] । माधुर्येण सौकुमार्येण च गुणेनोपपन्ना पाञ्चाली नाम रीतिः । ओजः कान्त्यभावादनुलम्बणपदाचेयं रीतिः । अस्या उदाहरणं यथा –

**मधुरया मधुबोधितमाधवी मधु समुद्धिसमेधितमेधया ।**

**मधुकराङ्गनया मुहुरून्मदध्वनिभृता निभृताक्षरमुज्जगे ।।**[9]

इत्थं रीतिविमर्शानन्तरं रीतेः साक्षात् सम्बन्धः यैः सह वर्तते तादृशानां गुणानां विषयेऽपि किञ्चित् ज्ञास्यामः ।

गुणलक्षणञ्च इत्थं लक्षितं लक्षणकरणपटुना वामनाचार्येण - **'काव्यशोभायाः कर्तारो धर्मा गुणाः**[10] । ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः । ते च औजप्रसादादयः । कति गुणाः? इति प्रश्नस्योत्तरमित्थंवर्णयति वामनः - **'ओजः प्रसादश्लेषसमता-समाधिमाधुर्यसोकुमार्योदारताऽर्थव्यक्तिकान्तयो बन्धगुणाः'**[11] ।

1. गाढत्वमोजः ।
2. शैथिल्यं प्रसादः ।
3. मसृणत्वं श्लेषः ।
4. मार्गाभेदः समता ।
5. आरोहावरोहक्रमः समाधिः ।
6. पृथक्पदत्वं माधुर्यम् ।
7. अजरठत्वं सौकुमार्यम् ।
8. विकारत्वमुदारता ।
9. अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः ।
10. औज्वल्यं कान्तिः ।[12]

प्राचीनाः दण्डी-वामनादयः आचार्याः दशगुणान् स्वीकुर्वन्ति, परं नवीनाः मम्मटविश्वनाथादयः त्रीन् गुणान् एव आमनन्ति ।

उक्तञ्च मम्मटाचार्येण - **'माधर्योजःप्रसादाख्याः त्रयस्ते न पुनर्दशः'** इति । माधुर्यम्, ओजः, प्रसादाश्च एते त्रयो गुणाः सौन्दर्यविद्वद्भिः यथावसरं प्रयुज्यन्ते । यत्र यस्य गुणस्य प्रकटनमपेक्ष्यते तत्र तैः स एव गुण उपयुज्यते

---

8काव्यालङ्कारसूत्रम् । (13/2/1)

9शिशुपालवधम् ।(20/6)

10काव्यालङ्कारसूत्रम् ।(1/1/3)

11काव्यालङ्कारसूत्रम् ।(4/1/3)

12काव्यालङ्कारसूत्रम् । (25/1/3 - 5/1/3)

। गुणोपयोगेन वाणी लेखो वा उत्कृष्टता याति । तदुपयोगेन श्रोतरिपाठकेवा समुचितोऽमोघः प्रभावो निपतति, तस्मादेवालङ्कारिकाः गुणान् सर्वदा आराधयन्ति ।

इत्थमत्र वामनोक्तरीतिगुणविमर्शः अस्माभिः चर्चितः, यद्यप्यालङ्कारिकाः स्वस्वग्रन्थे रीतिगुणनिरूपणं कृतवन्तः, परं न कोऽपि तेषु संप्रदायप्रवर्तकेन चरमोत्कृष्टं स्थानं विभर्ति, तत्स्थानं तु केवलं आचार्यप्रवरेण रीतिसंप्रदायप्रवर्तकेन वामनेनेव विभूषितं सुरक्षितञ्च । अतोऽत्र एकः लघुप्रयासः विहितः तन्मतसारप्रकटनायेतिदिग्मद्वाग्व्यापार जालेन ।

**।। सन्दर्भग्रन्थाः ।।**

1. काव्यालङ्कासूत्राणी – चौखम्बा सुरभारती प्रकाशन वाराणसी, पंण्डितश्री हरगोविन्दशास्त्री ।
2. अभिज्ञानशाकुन्तलम् – विश्वविद्यालय प्रकाशन वाराणसी, शिवशङ्करगुप्तः ।
3. शिशुपालवधम् – विद्याभवन वाराणसी प्रकाशन वाराणसी, पंण्डितश्री हरगोविन्दशास्त्री ।
4. काव्यालङ्कारसूत्रस्य कामधेनुटीका - चौखम्बा सुरभारती प्रकाशन वाराणसी, पंण्डितश्री हरगोविन्दशास्त्री ।

...Published by...
http://www.shantiejournal.com/

**SHANTI PRAKASHAN**

HQ.
1780, Sector-1, Delhi By pass,
ROHTAK-124001 (HARYANA)

**OTHER CONTACT**

D-19/220, Nandanvan Apartment
Nr. Bhavsar Hostel, New Vadaj,
AHMEDABAD-380013.